International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(2): 162-166
© 2017 IJSR
www.anantaajournal.com
Received: 12-01-2017
Accepted: 17-02-2017

**Dr. VP Udayakumar**
Assistant Professor, Department of Sanskrit Sahitya, Government Sanskrit College, Tripunithura, Kerala, India

**Correspondence**
**Dr. VP Udayakumar**
Assistant Professor, Department of Sanskrit Sahitya, Government Sanskrit College, Tripunithura, Kerala, India

# काळिदासकाव्येषु ज्योतिश्शास्त्रपरामर्शाः

**Dr. VP Udayakumar**

**प्रस्तावना**

सूर्यचन्द्रकुजादिखगोळानि प्राचीनकालादारभ्य मानवस्य चिन्ताः प्रचोदयन्ति स्म। अनन्ता अज्ञाता तथावर्णनीयाश्च गोळनक्षत्रादयः मेधाशालिनः प्राचीनमानवस्य चिन्ताः सदा तद्विषयकजिज्ञासया आकुलीकृताः। तत्फलरूपेण आविर्भूता चिन्ताधारा ज्योतिश्शास्त्रत्वेन परिणता। वर्षवातातपादीनां कालदेशावस्थारहस्यानि दैनन्दिनजीविते अवश्यमावश्यकानीति हेतोः ज्योतिर्गोळविचारशास्त्रं सर्वैरपि अध्येतव्यमासीत्। वेदाधिष्ठिताध्ययनसम्प्रदाये इतरशास्त्रै सह ज्योतिश्शास्त्रस्यापि प्रामुख्यमलभत। ज्योतिषामयनं चक्षुः इतीदं प्रसिद्धं किल। ज्योतिषं विना वेदार्थबोधः अपूर्णः स्यादिति कृत्वा शास्त्रमिदं परमप्रामाणिकं स्थानमवाप। वेदाङ्गेषु कानिचन शास्त्राणि पश्चात्काले तथा न पुष्टिंवापुः यथा ज्योतिश्शास्त्रम्। शास्त्रमिदं तु वेदाङ्गत्वादुपरि स्वतन्त्रशास्त्रत्वमवाप।।

तत्तत्कालीनाः आचार्याः स्वकीययोगदानेन शास्त्रमिदं परिपोषयामासुः। आर्यभटाचार्यः (AD 476) वराहमिहिराचार्यः, यवनाचार्याः, ब्रह्मगुप्तः, भास्कराचार्यः, आर्यभटः द्वितीय इत्येवमादयः ज्योतिश्शास्त्रपण्डिताः शास्त्रमिदं साङ्गोपाङ्गं पोषयामसुः। भारतस्य दक्षिणकोणे केरळराज्ये अपि ज्योतिश्शास्त्रं स्वयोगदानेन पोषितवन्तः पण्डिताः प्रचुरतया आसन्। दृग्गणितोपज्ञाता वटश्शेरि परमेश्वरः केळल्लूर् नीलकण्ठसोमयाजि, तृक्कण्डियूर् अच्युतपिषारोटि, जातकादेशकर्ता पुतुमन चोमातिरि, प्रश्नमार्गकर्ता एटक्काट् नम्पूतिरि, दशाध्यायीकारः तलक्कुळत्त् गोविन्दभट्टतिरि, पुन्नश्शेरि नीलकण्ठशर्मा इत्यादयः केरळीयाः विद्वांसः ज्योतिश्शास्त्रशाखां परिपोषयामासुः।।

वेदाङ्गेषु बहूनां शास्त्राणामध्ययनाध्यापनं त्रैवर्णिकाधिष्ठितमासीत्। ज्योतिश्शास्त्रं तु वर्णवर्गातीतं उन्नतिं प्राप इति तु श्रद्धेय एव। उपवेदः आयुर्वेदः अध्ययनाध्यापनाधिकारविषये त्रैवर्णिकाधिष्ठितं नियमं परित्यज्य वर्गवर्णातीतामवस्थामवाप। आयुरारोग्यविषयेषु मानवसामान्याधिष्ठितं प्राधान्यं

पुरस्कृत्य वर्गवर्णातीतावस्थाप्राप्तिः स्वाभाविकी एव। एवं तदानीन्तनवर्गवर्णाधिष्ठितां स्थितिमुल्लङ्घ्य लोके प्रचरितं शास्त्रान्तरं भवति ज्योतिश्शास्त्रमित्येतद् समाजे शास्त्रस्यास्य सार्वजनीनतां अनुपेक्षणीयत्वं दैनन्दिनजीवितावलम्बित्वं च प्रकाशयतीति वक्तव्यमेव। ईदृशस्य कस्यचन शास्त्रस्य प्राचीनकालसमाजे कियान् प्रभाव आसीदित्यन्वेषणं आधुनिककालजोतिश्शास्त्राध्ययने पिपठिषूणां प्रचोदनाय भवेदिति निस्तर्क एव।।

नैसर्गिकप्रतिभावान् विश्रुतनाटककृत् इत्येवं प्रसिद्धस्य काळिदासमहाकवेः प्रबन्धेषु विद्यमानानां शास्त्रपरामर्शानामन्वेषणं सहृदयदृष्ट्या काव्यास्वादनाय अनुपेक्षणीयं किञ्चिन्नास्ति। प्रीचीनकाले बहूनां पठनगवेषणानां परीक्षणनिरीक्षणानाञ्च विषयीभूतमिदं जोतिश्शास्त्रं मानवानां दैनन्दिनजीवते अत्यन्तमपेक्षितं प्रयोजकीभूतं च भवततीत्यतः तस्मिन् काले कवीनां शास्त्रकाराणाञ्च शास्त्रमिदं विगणय्य प्रबन्धविरचनमशक्यमासीत्। तस्माद् कविकुलगुरोः काळिदासस्य प्रबन्धेषु जोतिश्शास्त्रविषयाः कथं वा प्रतिपादिताः इत्येवं विषयमधिकृत्य चिन्तात्र प्रकाश्यते। जनाः कथं स्वीकृतवन्तः तस्य फलांशान् कथं दैनन्दिनजीविते उपयोजयामास इत्येवमादिविषयाः काळिदासप्रबन्धानाधारीकृत्य विशकलनं कर्तुं यत्नः अत्र क्रियते।।

ज्योतिश्शास्त्रविषयाः तथा निमित्तशास्त्रविषयाश्च साक्षादत्र काळिदासप्रबन्धेषु क्वचिद्दृश्यन्ते। तथा च जातकमुहूर्तादिचिन्ताः उपरागादीनां वर्णनाः तत्कालग्रहनक्षत्रस्थितयः सूर्यचन्द्रमसोः चारवशात् जायमानाः कालदेशवातावरणवैशिष्ट्याः अपि सुलभतयात्र परामृष्टाः वर्तन्ते।।

तथा हि आदित्यस्य चारवशात् सञ्जायमानयोः उत्तरायणदक्षिणायनयोः कालभेदयोः परामर्शः रघुवंशे नवमसर्गे तथा षोडशसर्गे च दृश्यते। तद्यथा

> जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्ततिवाहनः।
> दिनमुखानि रविर्हिमनिग्रहैर्विमलयन्मलयं नगमत्यजत्।। (रघु. 9-25)इति

धनदाध्युषितां दिशं जिगमिषुः रविः रथयुजा परिवर्तितवाहनः हिमनिग्रहैः दिनमुखानि विमलयन् मलयं नगमत्यजत्।। अत्र धनदाध्युषितां दिशं जिगमिषुरिति परामर्शः सूर्यस्य उत्तरायणगतिं सूचयति।

> अगस्त्यचिह्नादयनात्समीपं दिगुत्तरा भास्वति संनिवृत्ते।
> आनन्दशीतामिव बाष्पवृष्टिं हिमस्रुतिं हैमवतीं ससर्ज।। (रघु. 16-41)

भास्वति अगस्त्यचिह्नादयनात् समीपं सन्निवृत्ते (सति) उत्तरा दिक् आनन्दशीतां बाष्पवृष्टिमिव हैववती हिमस्रुतिं ससर्ज।।

अत्र अगस्त्यचिह्नादयनादिति प्रयोगः आदित्यस्य दक्षिणायनगतिं सूचयति। तत्रैव दिगुत्तरा भास्वति सन्निवृत्ते इत्यनेन सूर्यस्य दक्षिणायनादुत्तरायणगतिः सूच्यते। श्लोकस्यास्य उत्तरार्धे आनन्दशीतां पुष्पवृष्टिमिव हैमवतीं हिमस्रुतिं ससर्ज इति कविपरामर्शः उत्तरायणकाले जायमानस्य वातावरणभेदस्य सहृदयहृदयाह्लादिकाव्यात्मकवर्णनमेव।।

> तामर्पयामस च शोकदीनां तदागमप्रीतिषु तापसीषु।
> निर्विष्टसारां पितृभिर्हिमांशोरन्त्यां कलां दर्श इवौषधीषु।। (रघु. 14/72)

अत्र आमावासिमधिकृत्य चन्द्रस्य वृद्धिक्षये चाधिकृत्य सुव्यक्तः परामर्शः दृश्यते। दर्शे पितृभिः निर्विष्टसारां हिमांशोः अन्त्यां कलामिति प्रयोगात् अर्पयामास इति क्रियापदसादृश्यात् तथा शोकदीनां सीतां तदागमप्रीतिषु तापसीषु इत्यादिप्रयोगेभ्यश्च दर्शपितृतर्पणक्रियानुष्ठाने परिचितः वर्तते कविरिति वक्तुं शक्यते। यते हि पर्यायपीतस्य सुरैर्हिमांशोः इति विशेषपरामर्शादत्र पितृकर्मसूचना काळिदासहृदये आसीदिति सुव्यक्तमेव।

तिथीनां तथा नक्षत्राणाञ्च परामर्शाः काळिदासकाव्येषु बहुळतया दृश्यन्ते।

> तौ विदेहनगरीनिवासिनां गां गताविव दिवः पुनर्वसू।
> मन्यते स्म पिबतां विलोचनैः पक्ष्मपातमपि वञ्चनां मनः।। रघु. 11 /36

> इत्यत्र पुनर्वसुनक्षत्रमधिकृत्य, तथा
> तस्य प्रभानिर्ज्जितपुष्परागं
> पौष्यां तिथौ पुष्यमसूत पत्नी।
> यस्मिन्नपुष्यन्नुदिते समग्रां
> पुष्टिं जनाः पुष्य इव द्वितीये।। रघु. 18/31

**इत्यत्र श्लेषशक्त्या पुष्यनक्षस्य काव्यात्मकवर्णनं द्रष्टुं शक्यते।।**

**रघुवंशे प्रथमसर्गे** –

> काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः।
> हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव।। रघु. 1/46

इत्यस्मिन् श्लोके दिलीपसुदक्षिणयोः वसिष्ठाश्रमगमनवर्णनप्रस्तावे चित्राचन्द्रमसोः योगे इव इत्युपमाप्रयोगः कवेः ज्योतिश्शास्त्रज्ञानस्य निदर्शको वर्तते। यतो हि शिशिरर्तुमतीत्य चैत्रे मासे पौर्णम्यां चित्राचन्द्रमसोः योगः भवति। तदिदं ज्योतिश्शास्त्रसम्बन्धिविषयः काव्यात्मकेन केनचिदुपमाप्रयोगेण सहृदयसमक्षं प्रस्तौति महाकविः काळिदासः।।
अभिज्ञानशाकुन्तळे तृतीयेऽङ्के –
किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्तते – इति परामर्शः
तथा सप्तमाङ्के –

उपरागान्ते शशिनः समुपागता रोहिणीयोगः - इत्ययं परामर्शः च तारकाणां चन्द्रमसः च मिथः सम्बन्धं प्रकाशयति।

रघुवंशे अष्टमे सर्गे-

तिस्रस्त्रिलोकप्रथितेन सार्धमजेन मार्गे वसतीरुषित्वा।
तस्मादपावर्तते कुण्डिनेश पर्वात्यये सोम इवोष्णरश्मेः।। रघु. 8/33

इत्यत्र पर्वात्यये सोम इवोष्णरश्मेः इति प्रयोगादमावास्यामधिकृत्य सुव्यक्तं चित्रं लभ्यते।।
माळविकाग्निमित्रे –
तावदावां शीघ्रमेवापसरावो यावदङ्गारक इव सानुवक्रं न करोति (माळविकाग्निमित्रम् 3) इति परामर्शः ग्रहाणां गतिप्रकारानधिकृत्य कवेः अवबोधं प्रकाशयति।

## राशिज्ञानम्-

प्रययावातिथेयेषु वसन्नृषिकुलेषु नः।
दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः।। (रघु 12-25)

इत्यत्र रामः ऋष्याश्रमेषु त्रिभिः चतुर्भिश्च मासैः संवत्सरैश्च अवसदिति ऋक्षेषु वार्षिकेष्विव भास्करः इति उपमया प्रतिपादितम्। रामस्य ऋष्याश्रमवासः आदित्यस्य वर्षमासगतित्वेन वर्णितः। तेन सूर्यवंशप्रसूतस्य रामस्य रावणवधे तथा अन्यप्रवृत्तिषु प्रकटिष्यमाणप्रतापातिशयः व्यङ्ग्यमर्यादया सुष्ठु सूचितः। अत्र केवलं किञ्चित् ज्योतिश्शास्त्रतत्वं काव्यसङ्केतेन योजयित्वा अनुवाचकहृदयेषु द्राक्षापाकानुभूतित्वेन सन्निविष्टम्।।
आषाढस्य प्रथमदिवसे इति मेघदूतप्रयोगः वर्षकालीनं आषाढमासं किल सूचयति। तथा च

**भूयस्ततो रघुपतिर्विलसत्पताक-**

मध्यास्त कामगति सावरजो विमानम्।
दोषातनं बुधबृहस्पतियोगदृश्य-
स्तारापतिस्तरळविद्युदिवाभ्रवृन्दम्।। रघु. 13/64

इत्यत्र बुधबृहस्पतियोगदृश्यस्तारापतिः इति प्रयोगे चन्द्रस्य बुधेन गुरुणा च सह योगस्य साक्षात्परामर्शः द्रष्टुं शक्यते।

**उपरागः-**
सूर्यचन्द्रमसोः ग्रहणमधिकृत्यापि स्पष्टः परामर्शः काळिदासेन क्रियते। तथा हि –

तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव।।

इत्यत्र सुरद्विषश्चान्द्रमसी सुधेव इति प्रयोगः चन्द्रोपरागमधिकृत्य उक्तमिति स्पष्टमेव।।

सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः।। रघु. 12/28

इत्यत्र इन्दोरिव ग्रहः इति परामर्शोऽपि चन्द्रोपरागमधिकृत्य वर्तते। अत्र प्रथमे श्ळोके निश्चलः राहुः चलन्तं चन्द्रमसं ग्रसति इति वर्णनया तथा राहुरिन्दोः मार्गमावृत्य अतिष्ठदिति वर्णनया च पुराणाख्यानेन सह चन्द्रोपरागस्य कानिचनशास्त्रीयतत्वानि प्रकाशितानि।।

**जातकम्**
रघुवंशे तृतीयसर्गे जातकघटनामधिकृत्यापि केचन परामर्शाः काळिदासेन कृताः दृश्यन्ते। तथा हि –

ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसम्पदम्।
असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम्।।

इति रघोः जन्मवर्णनाप्रस्तावे तस्य जन्मपत्रिकामधिकृत्य सुव्यक्ता सूचना वर्तते। वाल्मीकिरामायणे अपि श्रीरामस्य उत्पत्तिकथाप्रसङ्गे इतोऽपि सुव्यक्तं सत् ग्रहस्थितयः वर्णिताः।।

**मुहूर्तम्**

रघुवंशे पञ्चमे सर्गे 36तमे श्लोके अजस्य जन्ममुहूर्तप्रतिपादनावसरे मुहूर्तस्य वैशिष्ट्यं प्रतिपादितम्। तथा हि –

ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम्।
अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार।। रघु. 5/36

किञ्च उत्तरार्धे वर्णितात् नामकरणपरामर्शात् मुहूर्तचिन्तामधिकृत्य काळिदासस्य आवबोधः आसीदिति वक्तुं शक्यते।।

**कुमारसम्भवे सप्तमे सर्गे** –

मैत्रे मुहूर्ते शशलाञ्छनेन योगं गतासूत्तरफाल्गुनीषु।
तस्याः शरीरं प्रतिकर्म चक्रुर्बन्धुस्त्रियो या पतिपुत्रवत्यः।। कुमा. 7/1

श्लोकेऽस्मिन् पार्वत्याः विवाहदीक्षामुहूर्तः स्पष्टतया परामृष्टः। अस्मिन्नेव सर्गे षष्ठे श्लोके पार्वतीशरीरस्य प्रतिकर्ममुहूर्तमधिकृत्यापि परामर्शः दृश्यते।

**समुद्रवेला-**

तं तस्थिवांसं नरगोपकण्ठे
तदागमारूढगुरुप्रहर्षः।
प्रत्युज्जगाम क्रथकैशिकेन्द्र-
श्चन्द्रं प्रवृद्धोर्मिरिवोर्मिमाली।।

चन्द्रं प्रवृद्धोर्मिः ऊर्मिमाली इव प्रत्युज्जगाम। अत्र समुद्रवेलां चन्द्रं प्रति प्रत्युद्गमनत्वेन सम्भाव्य वर्णना सहृदयानां चमत्कारमातनोत्येव।।
कुमारसम्भवे सप्तमे सर्गे 70तमः श्लोकः समुद्रवेलायाः चन्द्रस्य च मिथः सम्बन्धं प्रकाशयति। तथा हि-

दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधरक्षैः।
वेलासकाशं स्फुटफेनराशिर्नवैरुदन्वानिव चन्द्रपादैः।।

चन्द्रोदये स्फुटफेनराशेः समुद्रस्य वेला अत्र उपमानत्वेन कल्पिता।।

**तृतीये सर्गे** –

हरस्तु किञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि।। 3/67

इत्युपमाप्रयोगोऽपि अत्र स्मर्तव्य एव।

**रघुवंशे षोडशे सर्गे** –

स जहार तयोर्मध्ये मैथिली लोकशोषणः।
नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे।। रघु. 12/29

इत्यत्र अवग्रह इत्युपमा श्रावणप्रोष्ठमासयोः जायमानवर्षाभावात्मकवातावरणविशेषस्य काव्यात्मकवर्णना वर्तते। कार्षिककर्मानुबन्धिज्योतिश्शास्त्रविज्ञानं काव्ये समञ्जसतया समन्वितमत्र महाकविना काळिदासेन।।
निमित्तशास्त्रं फलज्योतिषस्याङ्गत्वेन परिगण्यते। इदं निमित्तशास्त्रमपि कविना परामृष्टं दृश्यते। तथा हि कुमारसम्भवे तृतीयसर्गे –

दृष्टिप्रपातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश।। कुम. 3 /43

अत्र पद्ये वर्णितं दृष्टिप्रपातमेतस्य उपोद्घलकं भवति।

**ऋतुसंहारे**

तारागणप्रवरभूषणमुद्वहन्ती
मेघावरोधपरिमुक्तशशाङ्कवक्त्रा।
ज्योत्स्नादुकूलाममलं रजनी दधाना वृद्धिं
प्रयात्यनुदिनं प्रमदेव बाला।। ऋतुसंहारः 3/7

**श्लोकोऽयमपि प्रायेण ज्योतिश्शास्त्रपरामर्शक इति वक्तुं शक्यते।।**

पितुः प्रयत्नात्स समग्रसम्पदः शुभैः शरीरावयवैर्दिने दिने।
पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः।। रघु. 3/22

इत्यस्मिन् श्लोके चन्द्रस्य दृश्यत्वं सूर्यकिरणैरिति आधुनिकशास्त्रतत्वं प्रतिपादितम्।

निद्रावशेन भवताप्यनवेक्षमाणा
पर्युत्सुकत्वमबला निशि खण्डितेव।
लक्ष्मीविनोदयति येन दिगन्तलम्बी
सोऽपि त्वदाननरुचिं विजहाति चन्द्रः।।

इत्यत्र प्रभातवर्णनप्रस्तावे चन्द्रस्य चारेण सम्बन्धं कल्पयित्वा प्रभातो जातः इति वाच्यतया प्रतिपादनं परित्यज्य काव्यात्मकतया वर्णितम्। ज्योतिश्शास्त्रान्तर्गतमिदं तत्वं सहृदयहृदयाह्लादजनककाव्यानुभूत्या सहृदयहृदयं प्रविशतु इति उदात्तं कविकर्म काळिदासे फलितं दृश्यते।।

यात्येकतोऽस्तशिखरं पतिरोषधीनामाविष्कृतारुणपुरस्सर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशान्तरेषु।।

इत्यादि शाकुन्तळीयपरामर्शाः तदानीन्तने काले ज्योतिश्शास्त्रं दैन्दिनजीविते समञ्जसतया सन्निविष्टमासीत् इत्यस्य निदर्शनं भवति। तथा च नागरिकीं संस्कृतिं अपरिचितभावेन पश्यन्तौ शार्ङ्गरवशारद्वतौ नित्यजीविते अपेक्षितेषु ज्योतिश्शास्त्रतत्वेषु निष्णातौ आस्ताम्।

## उपसंहारः

शास्यते उपदिश्यते अनेन इति शास्त्रमिति निष्पत्या अज्ञातार्थज्ञापकानि भवन्ति शास्त्राणि। तत्तत्कलीनसमाजाय यदपेक्षितं तत्प्रदानेन एव यत्किमपि शास्त्रं परिपूर्णं स्यात्। ज्योतिर्गोळान्यधिकृत्य मानवाधिवासभूतस्य भूगोळस्य ज्योतिर्गोळैः सह समीप्येन वा दूरेण वा जायमानावस्थाभेदानधिकृत्य तादृशावस्थाभेदान् पूर्वमेव विज्ञाय कालदेशानुसृतं जीवितं नेतुं तेन सामाजस्य सुस्थितिं सुगमतया परिपालयितुं च शास्त्रेणानेन कृतं योगदानं महदेव। प्राचीनतममिदं शास्त्रं शास्त्रान्तरमपेक्ष्य समाजस्य समस्तस्तरीयानां जनानामुपकारकमासीदिति प्राचीनग्रन्थपरामर्शेभ्योऽवगन्तुं शक्यते। आधुनिककालेऽपि वेदाधिकाररहिताः अपि शास्त्रमिदं पठित्वा प्रयोगं कृत्वा परिपोषयन्तीति वयं जानीमः। एवं प्राचीनकालादारभ्य प्रचरितस्य परिपुष्टस्य चास्य शास्त्रस्य प्राचीनकालीनजनेषु प्रभावः कथमासीदित्यन्वेषणं ज्ञिज्ञासूनां प्रचोदकाय भवत्येव। विशिष्य प्रतिभासम्पन्नस्य सर्वलोकसम्मतस्य कविकुलकूटस्थस्य सहृदयाग्रणेः काळिदासस्य हि कवेः काव्येषु शास्त्रचिन्तापरामर्शाणामन्वेषणं तच्छास्त्रस्य बहुजनसम्मतेः सूचकं स्यात्। शास्त्रकाव्याच्छाया काळिदासकाव्येषु यद्यपि नास्ति तथापि रसास्वादनप्रधानप्रबन्धरचनया शास्त्रतत्वांशाः सहृदयहृदयसन्निविष्टा भवन्तु इति कवेः तात्पर्यमिति वक्तुं शक्यते।।

## References


1. *Abhijnanasakuntala of Kalidasa* with Sararthadipika Commentary by His Highness Ramavarma and K Ramapisharoti, Mangalodayam Cooperative Limited, Trichur, 1913.
2. Brihajjatakam with the Bhattotpala commentary, Kedardatt Joshi, Commentator, Motilal Banarsidas, New Delhi, 2002.
3. *Kalidasa's Kumarasambhava*, with the Commentaries of Mallinatha, Caritravardhana, Nag Publishers, Delhi, 1989.
4. *Keralasahityacharitram*, Ulloor S. Parameswara Iyer, University of Kerala, Tiruvanantapuram, 1990, III.
5. Kumarasambhava of Kalidasa, M.R. Kale (Ed.) Motilal Banarsidas, New Delhi, 1995.
6. *Malaviakgnimitra of Kalidasa* with the Commentary Sararthadipika by K.Ramapisharoti, C.Sankara Rama Sastri Ed. Balamanorama Press Mylapore, Chennai, 1929.
7. Raghuvamsa of Kalidasa, Devadhar.C.R (Ed.), Motilal Banarsidas, New Delhi 1993.
8. *The Contribution of Kerala to Sanskrit Literature*, Kunjunni Raja.K, University of Madras 1980.
9. Varahamihira’s Brihatjataka with English Translation, Bangalore Suryanarayana Narayana Rao, Motilal Banarsidas, New Delhi 1998.